# ब्रह्मसूत्र-भाष्यम्

# श्रीशङ्करभगवत्पादाचार्यविरचितम्

# BRAHMASŪTRA-BHĀṢYAM

# ŚRĪ-ŚAṄKARA-BHAGAVAT-PĀDĀCĀRYA-VIRACITAM



## उपोद्घातः – अध्यासभाष्यम्

## (upodghātaḥ – adhyāsabhāṣyam)

## Section 1

### [आक्षेपभाष्यम् – आत्मानात्मनोः परस्पराध्यासो मिथ्या]

### [ĀKṢEPABHĀṢYAM – ĀTMĀNĀTMANOḤ PARASPARĀDHYĀSO MITHYĀ]

**युष्मत् अस्मत् प्रत्यय गोचरयोः**
**विषय विषयिणोः**
**तमप्रकाशवत् विरुद्धस्वभावयोः**
**इतरेतरभाव अनुपपत्तौ सिद्धायम्।**
**तत् धर्माणाम् अपि सुतराम् इतरेतरभाव अनुपपत्तिः। इत्यतः**

*yuṣmad asmat pratyaya gocarayoḥ*
*viṣaya viṣayiṇoḥ*
*tamaḥprakāśavad viruddha-svabhāvayoḥ*
*itaretarabhāvā anupapattau siddhāyāṁ,*
*taddharmāṇāmapi sutarām itaretarabhāvā anupapattiḥ — ityataḥ*

अस्मत् प्रत्यय गोचरे विषयिणि चिदात्मके
युष्मत् प्रत्यय गोचरस्य विषयस्य तत् धर्माणां च अध्यासः
तत् विपर्ययेण विषयिणः तत् धर्माणां च विषये अध्यासो
मिथ्या इति भवितुं युक्तम्।

*asmatpratyaya gocare viṣayiṇi cidātmake*
*yuṣmatpratyaya gocarasya viṣayasya taddharmāṇāṁ ca adhyāsaḥ,*
*tadviparyayeṇa viṣayiṇaḥ taddharmāṇāṁ ca viṣaye adhyāso*
*mithyā iti bhavituṁ yuktam.*

## 2

### [अध्याससमर्थनभाष्यम्]

### [ADHYĀSASAMARTHANABHĀṢYAM]

तथाऽपि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्य धर्मान् च अध्यस्य
इतरेतर अविवेकेन अत्यन्त विविक्तयोः धर्मधर्मिणोः
मिथ्या अज्ञान निमित्तः सत्यानृते मिथुनी कृत्य
अहमिदम् ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः।

*tathāpi anyo'nyasmin anyo'nyātmakatām anyo'nyadharmāṁśca adhyasya*
*itaretarāvivekena atyantaviviktayoḥ dharmadharmiṇoḥ,*
*mithyājñānanimittaḥ, satyānṛte mithunīkṛtya,*
*'aham idam', 'mama idam' iti naisargikaḥ ayaṁ lokavyavahāraḥ.*

## 3

### [अध्यासलक्षणभाष्यम्]

### [ADHYĀSALAKṢAṆABHĀṢYAM]

आह - कोऽयम् अध्यासो नामेति।
उच्यते - स्मृतिरूपः परत्र पूर्वदृष्ट अवभासः।

*āha – ko'yam adhyāso nāma iti.*
*ucyate – smṛtirūpaḥ paratra pūrvadṛṣṭāvabhāsaḥ.*

## 4

## [मतान्तरोक्ताध्यासलक्षणसङ्ग्रहभाष्यम्]

## [MATĀNTAROKTĀDHYĀSALAKṢAṆASAṄGRAHABHĀṢYAM]

तं केचित् अन्यत्र अन्यधर्म अध्यास इति वदन्ति ।
केचित्तु यत्र यत् अध्यासः तत् विवेक अग्रह निबन्धनो भ्रम इति ।
अन्ये तु यत्र यत् अध्यासः तस्य एव विपरीत धर्म कल्पनाम् आचक्षते ।
सर्वथापि तु अन्यस्य अन्यधधर्म अवभासतां न व्यभिचरति ।

*taṁ kecid anyatra anyadharmādhyāsaḥ iti vadanti.*
*kecit tu yatra yadadhyāsaḥ tadvivekāgraha-nibandhano bhrama iti.*
*anye tu yatra yadadhyāsaḥ tasyaiva viparītadharmatvakalpanām ācakṣate.*
*sarvathāpi tu anyasya anyadharmāvabhāsatāṁ na vyabhicarati.*

## 5

## [अध्यासस्वरूपे लोकानुभवः]

## [ADHYĀSASVARŪPE LOKĀNUBHAVAḤ]

तथा च लोकेऽनुभवः ।
शुक्तिका हि रजतवत् अवभासते । एकश्चन्द्रः सद्वितीयवत् इति ।
*tathā ca loke anubhavaḥ,*
*śuktikā hi rajatavad avabhāsate, ekaścandraḥ sadvitīyavad – iti.*

## 6

## [प्रकारान्तरेण अध्यासाक्षेपभाष्यम्]

## [PRAKĀRĀNTAREṆA ADHYĀSĀKṢEPABHĀṢYAM]

कथं पुनः प्रत्यगात्मनि अविषये अध्यासो विषय तत् धर्माणाम् ।
सर्वो हि पुरोऽवस्थित एव विषये विषयान्तरम् अध्यस्यति ।
युष्मत् प्रत्यय अपेतस्य च प्रत्यगात्मनः अविषयत्वं ब्रवीषि ।
*kathaṁ punaḥ pratyagātmani aviṣaye adhyāso viṣayataddharmāṇām.*
*sarvo hi puro'vasthite viṣaye viṣayāntaram adhyasyati,*
*yuṣmatpratyayāpetasya ca pratyagātmanaḥ aviṣayatvaṁ bravīṣi.*

## 7

### [आक्षेपनिराकरणभाष्यम्]

### [ĀKṢEPANIRĀKARAṆABHĀṢYAM]

उच्यते – न तावत् अयं एकान्तेन अविषयः
अस्मत् प्रत्यय विषयत्वात् अपरोक्षत्वात् च प्रत्यगात्म प्रसिद्धेः
न चायमस्ति नियमः। पुरोऽवस्थित एव विषये विषयान्तरम् अध्यसितव्यमिति।
अप्रत्यक्षेऽपि ह्याकाशे बालाः तल मलिनतादि अध्यस्यन्ति।
एवम् अविरुद्धः प्रत्यगात्मनि अपि अनात्म अध्यासः।

*ucyate – na tāvadayamekāntena aviṣayaḥ,*
*asmatpratyayaviṣayatvād aparokṣatvācca pratyagātmaprasiddheḥ.*
*na cāyam asti niyamaḥ – puro'vasthita eva viṣaye viṣayāntaram*
*adhyasitavyam – iti. apratyakṣe'pi hi ākāśe bālāḥ talamalinatādi adhyasyanti.*
*evam aviruddhaḥ pratyagātmanyapi anātmādhyāsaḥ.*

## 8

### [अध्यासः अविद्या]

### [ADHYĀSAḤ AVIDYĀ]

तमेतम् एवं लक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते।
तत् विवेकेन च वस्तुस्वरूप अवधारणं विद्याम् आहुः।
*tam etam evaṁlakṣaṇam adhyāsaṁ paṇḍitāḥ 'avidyā' iti manyante.*
*tadvivekena ca vastusvarūpāvadhāraṇaṁ 'vidyām' āhuḥ.*

## 9

### [सिद्धान्तभाष्यम्]

### [SIDDHĀNTABHĀṢYAM]

तत्रैवं सति यत्र यत् अध्यासः
तत्कृतेन दोषेण गुणेन वा अनुमात्रेणापि स न संबध्यते।
तमेतम् अविद्याख्यम् आत्म अनात्मनोः इतरेतर अध्यासं पुरस्कृत्य
सर्वे प्रमाण प्रमेय व्यवहारा लौकिकाः प्रवृत्ताः
सर्वाणि च शास्त्राणि विधि प्रतिषेध मोक्षपराणि।

*tatraivaṁ sati yatra yadadhyāsaḥ,*
*tatkṛtena doṣeṇa guṇena vā aṇumātreṇāpi sa na sambadhyate.*
*tametam avidyākhyam ātmānātmanoḥ itaretarādhyāsaṁ puraskṛtya*
*sarve pramāṇaprameyavyavahārāḥ laukikāḥ vaidikāśca pravṛttāḥ;*
*sarvāṇi ca śāstrāṇi vidhipratiṣedhamokṣaparāṇi.*

## 10

[सिद्धान्ताक्षेपभाष्यम्]

**[SIDDHĀNTĀKṢEPABHĀṢYAM]**

**कथं पुनः अविद्यावत् विषयाणि प्रत्यक्षादीणि प्रमाणानि शास्त्राणि चेति।**

*kathaṁ punaḥ avidyāvadviṣayāṇi pratyakṣādīni pramāṇāni śāstrāṇi ca iti?*

## 11

[सिद्धान्तसाधकतर्कभाष्यम्]

**[SIDDHĀNTASĀDHAKATARKABHĀṢYAM]**

**उच्यते। देहेन्द्रियादिषु अहं मम अभिमान रहितस्य प्रमातृत्व अनुपपत्तौ प्रमाण प्रवृत्ति अनुपपत्तेः।**
**न हि इन्द्रियाणि अनुपादाय प्रत्यक्षादि व्यवहारः संभवति।**
**न च अधिष्ठानम् अन्तरेण इन्द्रियाणां व्यापारः संभवति।**
**न च अध्यस्त आत्म भावेन देहेन कश्चित् व्याप्रियते।**
**न च एतस्मिन् सर्वस्मिन् असति असङ्गस्य आत्मनः प्रमातृत्वम् उपपद्यते।**
**न च प्रमातृत्वम् अन्तरेण प्रमाण प्रवृत्तिरस्ति।**
**तस्मात् अविद्यावत् विषयाणि एव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च।**

*ucyate – dehendriyādiṣu ahaṁmamābhimānarahitasya pramātṛtvānupapattau*
*pramāṇapravṛttyanupapatteḥ.*
*na hi indriyāṇi anupādāya pratyakṣādivyavahāraḥ sambhavati.*
*na ca adhiṣṭhānamantareṇa indriyāṇāṁ vyavahāraḥ sambhavati.*
*na ca anadhyastātmabhāvena*
*dehena kaścid vyāpriyate.*
*na ca etasmin sarvasmin asati asaṅgasya ātmanaḥ pramātṛtvam upapadyate.*
*na ca pramātṛtvam antareṇa pramāṇapravṛttiḥ asti.*
*tasmād avidyāvadviṣayāṇyeva pratyakṣādīni pramāṇāni śāstrāṇi ca.*

## 12

## [सिद्धान्तसाधकतर्कान्तरम्]

## [SIDDHĀNTASĀDHAKATARKĀNTARAM]

पश्वादिभिः च अविषेशात्।
यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति शब्दादि विज्ञाने
प्रतिकूले जाते ततो निवर्तन्ते अनुकूले च प्रवर्तन्ते।
तथा दण्डोद्यतकरं पुरुषम् अभिमुखम् उपलभ्य
मां हन्तुम् अयम् इच्छति इति पलायितुम् आरभन्ते।
हरित तृण पूर्ण पाणिम् उपलभ्य तं प्रति अभिमुखी भवन्ति।
एवं पुरुषा अपि व्युत्पन्नचित्ताः
क्रूरदृष्टीन् आक्रोशतः खड्गोद्यकरान् बलवत उपलभ्य ततो निवर्तन्ते।
तत् विपरीतान् प्रति प्रवर्तन्ते।
अतः समानः पश्वादिभिः पुरुषाणां प्रमाण प्रमेय व्यवहारः।
पश्वादीनां च प्रसिद्धः अविवेक पुरःसरः प्रत्यक्षादि व्यवहारः
तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादि व्यवहारः
तत् कालः समान इति निश्चीयते।

*paśvādibhiścāviśeṣāt.*
*yathā hi paśvādayaḥ śabdādibhiḥ śrotrādīnāṁ sambandhe sati śabdādivijñāne*
*pratikūle jāte tato nivartante anukūle ca pravartante –*
*yathā daṇḍodyatakaraṁ puruṣam abhimukham upalabhya*
*'māṁ hantum ayam icchati' iti palāyitum ārabhante;*
*haritatṛṇapūrṇapāṇim upalabhya taṁ prati abhimukhībhavanti.*
*evaṁ puruṣā api vyutpannacittāḥ*
*krūradṛṣṭīn ākrośataḥ khaḍgodyatakarān balavataḥ upalabhya tato nivartante,*
*tadviparītān prati pravartante.*
*ataḥ samānaḥ paśvādibhiḥ puruṣāṇāṁ pramāṇaprameyavyavahāraḥ.*
*paśvādīnāṁ ca prasiddhaḥ avivekapuraḥsaraḥ pratyakṣādivyavahāraḥ.*
*tatsāmānyadarśanād vyutpattimatāmapi puruṣāṇāṁ pratyakṣādivyavahāraḥ*
*tatkālaḥ samānaḥ iti niścīyate.*

## 13

## [सिद्धान्तसाधकतर्कशेषः]

### [SIDDHĀNTASĀDHAKATARKAŚEṢAḤ]

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी
न अविदित्वा आत्मनः परलोकसंबन्धम् अधिक्रियते।
तथापि न वेदान्तवेद्यम् अशनायादि अतीतम्
अपेतब्रह्मक्षत्रादिभेदम् असंसारि आत्मतत्त्वम् अधिकारे अपेक्ष्यते।
अनुपयोगात् अधिकार विरोधाच्च।
प्राक् च तथाभूतात्म विज्ञानात्
प्रवर्तमानं शास्त्रमविद्यावत् विषयत्वं नातिवर्तते।
तथा हि ब्राह्मणो यजेत इत्यादीनि शास्त्राणि
आत्मनि वणाश्रम वयो अवस्थादि विशेष अध्यासम् आश्रित्य प्रवर्तन्ते।

*śāstrīye tu vyavahāre yadyapi buddhipūrvakārī*
*na aviditvā ātmanaḥ paralokasambandham adhikriyate.*
*tathāpi na vedāntavedyam aśanāyādyatītam*
*apetabrahmakṣatrādibhedam asaṁsāri ātmatattvam adhikāre apekṣyate,*
*anupayogād adhikāravirodhācca.*
*prāk ca tathābhūtātmavijñānāt*
*pravartamānaṁ śāstram avidyāvadviṣayatvaṁ na ativartate.*
*tathā hi – 'brāhmaṇo yajeta' ityādīni śāstrāṇi*
*ātmani varṇāśramavayo'vasthādiviśeṣādhyāsam āśritya pravartante.*

## 14

## [अध्यासलक्षणसमन्वयः]

### [ADHYĀSALAKṢAṆASAMANVAYAḤ]

अध्यासो नाम अतस्मिन् तत् बुद्धिः इति अवोचाम।
तद्यथा - पुत्र भार्यादिषु विकलेषु सकलेषु वा
अहमेव विकलः सकलो वेति बाह्यधर्मान् आत्मनि अध्यस्यति।
तथा देहधर्मान् स्थूलोऽहं कृशोऽहं गौरोऽहं तिष्ठामि गच्छामि लङ्घयामि च इति।
तथा इन्द्रियधर्मान् - मूकः काणः क्लीबो बधिरोऽन्धोऽहम् इति।
तथा अन्तःकरणधर्मान् काम सङ्कल्प विचिकित्सा अध्यवसायादीन्।

*adhyāso nāma atasmiṁstadbuddhiḥ ityavocāma.*
*tadyathā putrabhāryādiṣu vikaleṣu sakaleṣu vā*
*'ahameva vikalaḥ sakalo vā' iti bāhyadharmān ātmani adhyasyati;*
*tathā dehadharmān – sthūlo'haṁ, kṛśo'haṁ, gauro'haṁ, tiṣṭhāmi, gacchāmi, laṅghayāmi ca iti;*
*tathā indriyadharmān – mūkaḥ, kāṇaḥ, klībaḥ, badhiraḥ, andho'ham iti;*
*tathā antaḥkaraṇadharmān kāmasaṅkalpavicikitsādhyavasāyādīn.*

एवम् अहं प्रत्ययिनम् अशेष स्वप्रचार साक्षिणि प्रत्यगात्मनि अध्यस्य
तं च प्रत्यगात्मानं सर्व साक्षिणं तत् विपर्ययेण
अन्तःकरणादिषु अध्यस्यति ।
*evamahaṁpratyayinam aśeṣasvapracārasākṣiṇi pratyagātmani adhyasya*
*taṁ ca pratyagātmānaṁ sarvasākṣiṇaṁ tadviparyayeṇa*
*antaḥkaraṇādiṣu adhyasyati.*

## 15

### [अध्यासविचारनिगमनभाष्यम्]

### [ADHYĀSAVICĀRANIGAMANABHĀṢYAM]

एवम् अयम् अनादिः अनन्तो नैसर्गिको अध्यासो मिथ्या प्रत्ययरूपः
कर्तृत्व भोक्तृत्व प्रवर्तकः सर्वलोकप्रत्यक्षः ।
अस्य अनर्थ हेतोः प्रहाणाय अत्मैकत्व विद्या प्रतिपत्तये
सर्वे वेदान्ता आरभ्यन्ते ।

*evamayam anādirananto naisargikaḥ adhyāso mithyāpratyayarūpaḥ*
*kartṛtva-bhoktṛtvapravartakaḥ sarvalokapratyakṣaḥ.*
*asyānarthahetoḥ prahāṇāya ātmaikatvavidyāpratipattaye*
*sarve vedāntā ārabhyante.*

**16**

[शारीरकमीमांसाभाष्यारम्भप्रतिज्ञा ]

**[ŚĀRĪRAKAMĪMĀṀSĀBHĀṢYĀRAMBHAPRATIJÑĀ]**

**यथा च अयम् अमर्थः सर्वेषां वेदान्तानाम्**

**तथा वयम् अस्यां शारीरकमीमांसायां प्रवदिष्यामः।**

**इति अध्यासभाष्यम्**

*yathā cāyamarthaḥ sarveṣāṁ vedāntānāṁ*

*tathā vayamasyāṁ śārīrakamīmāṁsāyāṁ pradarśayiṣyāmaḥ.*

*– iti adhyāsabhāṣyam –*

--------------------------------------------------------------------------------------------

**Jijñāsādhikaraṇam** - Desire to Know

1. अथातो ब्रह्मजिज्ञासा। (१.१.१)

*athāto brahmajijñāsā. (1.1.1)*

**Janmādyadhikaraṇam** - Conglomerate Beginning with Birth

2. जन्माद्यस्य यतः। (१।१।२)

*janmādyasya yataḥ (1.1.2 )*

**Śāstrayonitvādhikaraṇam** - Scripture Being the Sourced/Source

3. शास्त्रयोनित्वात्। (१.१.३)

*śāstrayonitvāt (1.1.3 )*

**Samanvayādhikaraṇam** - Harmony

4. तत्तु समन्वयात्। (१.१.४) *tattu samanvayāt. (1.1.4)*

--------------------------------------- *Om Tat Sat* ------------------------------------